# आम्बेडकर-महाविद्यालये संस्कृतदिवस-कार्यक्रमः

# Celebration of Sanskrit Day

# 17/08/2019

त्रिपुराराज्ये ऊनकोटी-मण्डलस्य फटिकराय-जनपदस्थे आम्वेडकर-महाविद्यालये संस्कृतविभाग-अनौपचारिक-संस्कृत-शिक्षण-केनद्रयोः सहयोगेन अगस्ट-मासस्य सप्तदशतमे दिनाङ्के संस्कृतदिवसः आयोजितः। कार्यक्रमे मुख्यातिथिरूपेण आसन् राष्ट्रिय-संस्कृत-संस्थानस्य एकलव्य-परिसरस्य अद्वैत-वेदान्त-विभागस्य शिक्षकः श्री-सम्बित्-महापात्र-महोदयः। सभायाम् अध्यक्षताम् अकुर्वन् महाविद्यालयस्य मुख्यः डा. सुव्रत-शर्मा-महोदयः। कार्यक्रमस्य प्रराम्भम् अभूत् प्रदीपप्रज्वलनेन सरस्वत्याः वन्दनया च। तस्मिन् अवसरे अनौपचारिक-संस्कृत-शिक्षण-केन्द्रस्य शिक्षिका छात्राश्च संस्कृतभाषायाः गौरवगाथां गीतवन्तः। पश्चात् महाविद्यालयस्य संस्कृतविभागाध्यक्षः डा.अनिल-कुमार-आचार्यः स्वागतभाषणम् उपस्थापितवान्। अपि च कार्यक्रमे महाविद्यालयस्य संस्कृपठनेच्छुकाः च्छात्राः, शिक्षकाः च उपस्थिताः आसन्। सभायां प्रामुख्येन मुख्यातिथिभिः स्वभाषणेन संस्कृतपठनस्य उपकारिता समुपस्थापिता। पश्चात अन्ते महाविद्यालयस्य प्रमुखः डा. शर्मा-महोदयैः संस्कृतं सांस्कृतिकि-भावनां च जनमानसेषु जागरणीया इति सङ्कलपवचोभिः समुपस्थितान् संस्कृतानुरागिणं प्रबोधितवान्। सभायाः समाप्तिः जाता औपचारिकेन धन्यवादार्पणेन।









